# Shri Shiva Stuti

# શ્રીશિવસ્તુતિઃ ૧૫

## Document Information

Text title : Shri Shiva Stuti 02 11

File name : shivastutiH15.itx

Category : shiva, stuti

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-11

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીશિવસ્તુતિઃ ૧૫

(ઇયં સ્તુતિઃ શિવવિષ્ણુબ્રહ્મબુદ્ધપરા, અનન્વિતપદાર્થા ચ ભવતિ)
ત્રૈલોક્યં સકલં ત્રિકાલવિષયં સાલોકમાલોકિતં
 સાક્ષાદ્યેન યથાસ્વયં કરતલે રેખાત્રયં સાઙ્ગુલે ।
રાગદ્વેષભયપ્રિયાન્તકજરાલોલત્વલોભાદયો
 નાલં યત્પદલઙ્ઘનાય સ મહાદેવો મયા વન્દ્યતે ॥ ૧॥

દગ્ધં યેન પુરત્રયં શરભુવા તીવ્રાર્ચિષા વહ્નિના
 યોઽપાનૃત્યતિ મત્તવત્ પિતૃવને યસ્યાત્મજો વા ગુહઃ ।
સોઽયં કિં મમ શઙ્કરો ભયતૃષારોષાર્તિમોહક્ષયં
 કૃત્વા યઃ સ તુ સર્વવિત્તનુભૃતાં ક્ષેમઙ્કરઃ શઙ્કરઃ ? ॥ ૨॥

યત્નાદ્યેન વિદારિતં કરરુહૈર્દૈત્યેન્દ્રવક્ષસ્સ્થલં
 સારથ્યેન ધનઞ્જયસ્ય સમરે યોઽમારયત્કૌરવાન્ ।
નાસૌ વિષ્ણુરનેકકાલવિષયં યજ્જ્ઞાનમવ્યાહતં
 વિશ્વં વ્યાપ્ય વિજૃમ્ભતે સ ચ મહાવિષ્ણુર્વિશિષ્ટો મમ ॥ ૩॥

યો જગ્ધ્વા પિશિતં સમત્સ્યકબલં જીવન્તી શૂન્યં પદં (?)
 કર્તા કર્મફલં ન ભુઙ્ક્ત ઇતિ યો વક્તા સ બુદ્ધઃ કથમ્ ।
યજ્જ્ઞાનં ક્ષણવર્તિ વસ્તુ સકલં જ્ઞાતું ન શક્તં સદા
 યો જાનન્ યુગપજ્જગત્ત્રયમિદં સાક્ષાત્સ બુદ્ધો મમ ॥ ૪॥

પૂર્વસ્યામુદપાદિ રાગબહુલં ચેતો યદીયં પુનઃ
 પાત્રં દણ્ડકમણ્ડલુપ્રભૃતયો યસ્યાકૃતાર્થા સ્થિતિમ્ ।
આવિર્ભાવયુતં ભવન્તિ સ કથં બ્રહ્મા ભવેન્માદૃશં
 ક્ષુત્તૃષ્ણાશ્રમરાગરોષરહિતો બ્રહ્મા કૃતાર્થોઽસ્તુ નઃ ॥ ૫॥

બ્રહ્મા ચર્માક્ષસૂત્રીસુરયુવતિરસાવેશવિભ્રાન્તચેતાઃ
 શમ્ભુઃ ખટ્વાઙ્ગધારી ગિરિપતિતનયાપાઙ્ગલીલાનુબદ્ધઃ ।
વિષ્ણુશ્ચક્રાધિપઃ સન્ દુહિતરમગમદ્ગોપનાથસ્ય મોહા-

દસ્મિન્ વિધ્વસ્તરાગો જિતભયમરણઃ કોઽયમેષ્વાપ્તનાથઃ ॥ ૬॥

યો વિશ્વં વેદ વેદ્યા જનભજલનિધેર્ભઙ્ગિનઃ પારદૃશ્વા (?)
પૌર્વાપર્યાવિરુદ્ધં વચનમનુપમં નિષ્કલઙ્કં યદીયમ્ ।
તં વન્દે સાધુ વન્ધં સકલગુણનિધિં ધ્વસ્તદોષં દ્વિષન્તો
બુદ્ધં વા વર્ધમાનં શતદલનિલયં કેશવં વા શિવં વા ॥ ૭॥

ઈશઃ કિં છિન્નલિઙ્ગો યદિ વિગતભયઃ શૂલપાણિઃ કથં સ્યાત્
નાથઃ કિં ભૈક્ષચારી યતિરિતિ સ કથં સઙ્ગનઃ સાત્મજશ્ચ ।
આદ્રાજઃ કિં ત્વજન્મા સકલવિદિતિ કિં વેત્તિ નાત્માન્તરાયં
સઙ્ક્ષેપાત્સમ્યગુક્તં પશુપતિમપશુઃ કોઽત્ર ધીમાનુપાસ્તે ॥ ૮॥

નાહઙ્કારવશીકૃતેન મનસા ન દ્વેષિણા કેવલં
નૈરાત્મ્યં પ્રતિપદ્ય નશ્યતિ જને કારુણ્યબુદ્ધ્યા મયા ।
રાજ્ઞઃ શ્રીહિમશીતલસ્ય સદસિ પ્રાયો વિદગ્ધાત્મનો
બૌદ્ધૌઘાન્ સકલાન્ વિજિત્ય સઘટઃ પાદેન વિસ્ફાટિતઃ ॥ ૯॥

॥ ઇતિ શ્રીશિવસ્તુતિઃ સમ્પૂર્ણા ॥

Proofread by Aruna Narayanan

*Shri Shiva Stuti*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*